KERALA SCHOOL KALOLSAVAM 2017 PROGRAMME COMMITTEE

विषय: - सा एकाकिनी

प्रिय पुत्र: .....

सायङ्कालः। भित्तिघटि पञ्चवादनः इति सशब्दं सूचयतिस्म। रमेशः दूरदर्शने पादकन्दुकक्रीडां पश्यन् आसीत्। तदा तस्य पत्नी सीता तेषां वृन्दावनं सिञ्चतिस्म। तत्र वृन्दावने बहवः पुष्पाः सन्ति। तदनन्तरं सीता चाया सहितं रमेशस्य पार्श्वे आसन्दे उपविशत्। सा चाया तस्मै अददात्। "हे प्रिये सीते, चाया अतिमधुरम्। मनोहरम्! एतादृशः मधुरवार्ता अपि ममसकाशम् अस्ति। तत्र वार्तां श्रृणोतुम् आकांक्षा अस्ति वा?" चायां पीत्वा रमेशः अपृच्छत्। सा अब्रूत् - "किमर्थम् एवं वदन्ति? तत्र वार्ता श्रवणाय मम मनः इच्छां करोति।

झटिति एव वदतु।" तदा रमेशः सहासम् एवं अवदत्
"हे सीते, ह्यः एव मम अधिकारि मह्यम् एवम् अवदत्।
मह्यम् उन्नतस्थानलब्धिं प्राप।" "किम्? उन्नतस्थानम्?
यदि उन्नतस्थानं प्राप्नोति तर्हि तव वेतनमपि अधिकं
भवेत्।" "सत्यमेव। मम वेतनमपि अवर्धयत्।" रमेशः
अवदत्। "वेतनम् अधिकं लभति चेत्.....' सीता तस्य
स्वप्नलोकस्य निर्माणं कर्तुम् आरब्धवती। "हे प्रियः,
अस्माकं गृहं प्राचीनम् अभवत्। खलु। इदानिम् एकं
नवगृहनिर्माणं करणीयम्।" सा अवदत्। "एतदेव मम
स्वप्नम्।" रमेशः अपि सीतायाः स्वप्नलोके भागम् अभवत्।
तत् सायङ्काले सीता रमेशश्च अन्यलोके आसीत्।
"रमेशः नाम महोदयः अत्र अस्ति वा?" एतत् प्रश्न-
श्रवणानन्तरं लघु कम्पनात् तेषां चिन्तनधारा छिन्ना:।
रमेशः तस्य स्वप्नलोकात् वर्तमानकाले
आगतः। तदापि सीता स्वप्नं पश्यतिस्म। सः झटित्येव
गृहस्य पुरतः आगतः। आङ्गणे एकं तिष्ठति।

सः मानवः रमेशं प्रति अवदत् - " अहं पत्र-कार्यालयात् आगमिष्यामि। रमेशः अत्र अस्ति वा? तस्मै एकं पत्रम् अस्ति।" "अहम् एव रमेशः।" सः तत् पत्रं स्वीकृतः। रमेशः तस्य ~~प्रा~~ प्रकोष्ठे गत्वा तत् पत्रं अपठत्। तत् पत्रं तस्य अम्बायाः आसीत्। पत्रे एवं लिखतिस्म।

" प्रिय पुत्रः,

त्वं सौख्यमेनैव जीवन्ति, खलु। तव सौख्यमेव मम जीवनस्य आधारम्। तव कृते मम अन्तिमं पत्रमेव एतत्। इतः परम् अहं तव नाम्ने पत्रं लिखितुं नार्हति। अहम्....।

ह्यः अहं तव चित्रं ~~पश्यतिस्म~~ पश्यन् आसीत्। तदा तव बाल्यकालं मम स्मरणायाम् आगतः। त्वं अस्माकं एकमात्र पुत्रः ननु! अहं, तव पिताश्च मिलित्वा एव बाल्यकालादारभ्य तव पालनम् अकरोत्। बाल्ये त्वम् अतीवसुन्दरः, चपलः चासीत्। क्षामकाले, यदा दारिद्र्य

देवि अस्माकं गृहे नर्तनं करोतिस्म, तदा प्रियपुत्र त्वं चकलेहाद्विमधुरं खादितुम इच्छासि एकं देयकम अस्माकं कृते अयच्छत। तत सर्वं अद्य अपि अहम स्मरामि। तत देयकम एवम आसीत।

| विवरणम | रू |
| --- | --- |
| पठनार्थम | - २ रू |
| आपणगमनार्थम | - ६ रू |
| जलसिञ्चनार्थम | - २ रू |
| योग: | २० रू |

तदा एव आवां दशरूप्यकाणि तवहस्ते ददात। तदा तव वदनं पूर्णचन्द्र: इव आसीत। तव मन्दहासाय ~~चद चद~~ यत यत आवश्यकं, तत सर्वम आवाम महतां प्रयत्नं कृत्वा अदात। हे रमेश:, तव इच्छानुसारमेव त्वं देहलीं गत्वा पठनमकरोत।

तव पिता दिनकर:। तस्य वदनम कदा मा विस्मर:। यदा दिनकर:, मम पति रोगकारण: मूर्छां प्राप्ता आतुरालयं प्राप, तदा तस्य अन्तिमम

इच्छा 'तव दर्शनम्' एव आसीत्। किन्तु त्वं दूरवाण्यां एवम् अवदत् - "अहं न वैद्यः। अतः किमर्थं तत्र आगमनं करणीयम्।" इति। किञ्चित् दिनानन्तरं मम पति मृत्युम् उपगत। "अहं मरणानन्तर कर्म श्राद्धं कर्तुं न इच्छामि" - इति वक्त्वा मरणानन्तर-मपि त्वं न आगतः। एवं मनशान्तिं विना मम पति स्वर्गलोकं प्राप।

KERALA SCHOOL KALOLSAVAM-2017
PROGRAMME COMMITTEE

पुत्र, यदा त्वं पठनं समाप्य कर्मसहितं गृहे प्रत्यागच्छत्, तदा अहं अतीव सन्तोषवती आसीत्। रमेशः, त्वं एव तव पत्नीं ~~आन्वेषणं~~ अन्वेषणं कृत्वा विवाहम् अकरोत्। विवाहानन्तरं मम स्थानम् एतत् अनाथालयम् अभवत्। तदापि अहं दुःखिता न भवामि। त्वं सौख्येन एव जीवन्ति - एतत् वार्ता मह्यं सुखं प्रददाति। ह्यः सायङ्काले त्वं द्रष्टुम् अस्माकं गृहं प्रति आगच्छामि स्म। तदा मार्गमध्ये एव अहं मूर्च्छां प्राप्य अपतत्। इदानीम् अहम् एकं आतुरालये अस्मि। "मम रक्षणम्

अतिकठिनम्" इति वैद्याः अवदत्। अतः एव अहम्
एतत् पत्रम् अलिखत। त्वं सुखेन जीवनं करणीयम्।
मम आशिर्वादः सर्वदा तव साकं अस्ति। इदानीम् एकं
देयकम् अहं तव प्रति देतुं इच्छामि।

विवरणम् — रू

~~बाल्यका~~
बाल्यकालादारभ्य पालनम् - न किमपि
चिकित्सार्थम् - न किमपि
पठनार्थम् - न किमपि

योगः - न किमपि

अद्य वा श्वः मम मरणं भवेत्। रोदनं मा कुरु। अलं रोदनेन। एवं वक्त्वा अहं मम पत्रं समाप्तं कर्तुम् इच्छामि।

सस्नेहं
तव माता ... "

पत्रं पठित्वा रमेशस्य नेत्रात् अश्रूणी निर्गतानी। सः विना चलनं तूष्णीम् अतिष्ठत्।.......